## अध्याय :- २९ chapter-29

नारद उवाच ।।[१]

वज्रंती[२] गिरिजा पश्यत्सखीं मातुर्महाप्रभाम् ।।
कुसुमामोहिनीं नाम तस्य शैलस्य देवताम् ।। १

सापि दृष्ट्वा गिरिसुतां स्नेह विक्लवमानसा ।।
क्वपुनर्गच्छसीत्युच्चैरालिंग्यो वाच देवता ।। २

सा चास्यै सर्वमाचख्यौ शंकरात्कोप कारणम् ।।
पुनश्चोवाच गिरिजा देवतां मातृसंमताम् ।। ३

नित्यं शैलाधिराजस्य देवता त्वमनिंदते ।।
सर्वं च सन्निधानं च मयि चावीव वत्सला ।। ४

तदहं संप्रवक्ष्यामि यद्विधेयं तवाधुना ।।
अथान्य स्त्री प्रवेशे तु समीपे तु पिनाकिनः ।। ५

त्वयाख्येयं मम शुभे युक्तं पश्चात्करोम्यहम् ।।
तथेत्युक्ते तया देव्या ययौ देवी गिरिं प्रति ।। ६

रम्ये तत्र महाशृंगे नानाश्चर्योपशोभिते ।।
विभूषणादि संन्यस्य वृक्ष वल्कल धारिणी ।। ७

---

१ नारद उवाच ।। ब. प्रतौ नास्ति ।
२ ब. ति

तपस्तेपे गिरिसुता पुत्रेण परिपालिता ।।
ग्रीष्मे [1]पंचाग्निमध्यं तप्त्वा वर्षासु च जलोषिता ।। ८

स्थंडिलस्था च हेमंते निराहारा ततापसा ।।
एतस्मिन्नंतरे दैत्यो ह्यंधकस्य सुतो बली ।। ९

ज्ञात्वा गतां गिरिसुतां पितुर्वैरमनुस्मरन् ।।
आडिर्नाम बकभ्राता रहस्यांतर प्रेक्षकः ।। १०

जिते किलांधके दैत्ये गिरिशेनामरद्विषि ।।
आडिश्चकार विपुलं तपो हरजिगीषया ।। ११

तमागत्याब्रवीद्ब्रह्मा तपसा परितोषितः ।।
ब्रूहि किं वासुरश्रेष्ठ तपसा प्राप्तुमिच्छसि ।। १२

ब्रह्माणमाह दैत्यस्तु निर्मृत्युत्वमहं वृणे ।।
ब्रह्मोवाच ।।[2]
न कश्चिच्च विना मृत्युं जंतुरासुर विद्यते ।। १३

यतस्ततोपि दैत्येंद्र मृत्युः प्राप्यः शरीरिणा ।।
इत्युक्तो दैत्यसिंहस्तु प्रोवाचांबुज संभवम् ।। १४

---

१ ब. पंचाग्नि.....
२ ब. श्री ब्रह्मा उवाच ।।

रूपस्य परिवर्तो मे यदा स्यात्पद्म संभव ।।
तदा मृत्युर्मम भवेदन्यथा त्वमरो ह्यहम् ।। १५

इत्युक्तस्तं तथेत्याह तुष्टः कमलसंभवः ।।
इत्युक्ता/मरतां मैने दैत्यै राज्यस्थितो/सुरः ।। १६

आजगाम स च स्थानं तदा त्रिपुरघातिनः ।।
आगतो ददृशे तं च वीरकं द्वार्यवस्थितम् ।। १७

तं चासौ वंचयित्वा च आडिः सर्पशरीरभृत् ।।
अवारितो वीरकेण प्रविवेश हरांतिकम् ।। १८

भुजंगरूपं संत्यज्य बभूवाथ महासुरः[१] ।।
उमारूपी छलयितुं गिरिशं मूढ चेतनः ।। १९

कृत्वोमायास्ततो रूपमप्रतर्क्य मनोहरम् ।।
सर्वावि यव संपूर्ण सर्वाभिज्ञान संवृतम्[२] ।। २०

चक्रे भगांतरे दैत्यो दंतान्वज्रोपमान्दृढान् ।।
तीक्ष्णाग्रान्बुद्धि मोहेन गिरिशं हंतुमुद्यतः ।। २१

---

१ ब. र
२ ब. संवृतः

कृत्वोमारूपमेवं स स्थितो दैत्यो हरांति के ।।
तां दृष्ट्वा गिरिशस्तुष्टः समालिंग्य महासुरम् ।। २२

मन्यमानो गिरिसुतां सर्वै रवयवांतरैः ।।
अपृच्छत्साधु ते भावो गिरिपुत्री ह्यकृत्रिमा ।। २३

या त्वं मदाशयं ज्ञात्वा[1] प्राप्तेह वरवर्णिनि ।।
त्वया विरहितः शून्यं मन्येस्मिन्भुवन[2] त्रये ।। २४

प्राप्ता प्रसन्ना या त्वं मां युक्तमेवं विधं त्वयि ।।
इत्युक्ते गूहयंश्चेष्टामुमारूप्य सुरो/ब्रवीत् ।। २५

यातास्मि तपसश्चैतु कालीवा क्यात्तवातुलम् ।।
रतिश्च तत्र मे नाभूततः प्राप्ता तवांतिकम् ।। २६

इत्युक्तः शंकरः शंकां किंचित्प्राप्या वधारयत् ।।
कुपिता मयि तन्वंगी प्रत्यक्षा च दृढव्रता ।। २७

अप्राप्तकामा संप्राप्ता किमेतत्संशयो मम ।।
रहसीति विचिंत्याथ अभिज्ञानद्विचारयन् ।। २८

---

१ ब. प्रती "कृत्वा" इति पाठः ।
२ ब. त्रयं

नापश्यद्वामपार्श्वे तु तस्यां कं पद्मलक्षणम् ।।
लोमामावर्त चरितं ततो देवः[१] पिनाकधृक ।। २९

बुद्धवा[२] तां दानवीं मायां किंचित्प्रहसिताननः ।।
मेढ्रे[३] रौद्रास्त्रमाधाय चक्रे दैत्यमनोरथम् ।। ३०

स रुदन्भैरवान्रावानवसादं गतो/सुरः ।।
अबुध्य॒ द्वीरको नैतदसुरेंद्रनिषूदनम् ।। ३१

एते च मारुतेनाशुगामिना नगदेवता ।।
अपरिच्छिन्नतत्वार्था शैलपुत्र्यान्यवेदयत् ।। ३२

श्रुत्वा वायुमुखादेवी क्रोधारक्तातिलोचना ।।
अपश्यद्वीरकं पुत्रं त्ददयेन विदूयता ।। ३३

मातरं मां परित्यज्य यस्मात्वं स्नेहविह्वलाम् ।।
विहितावसरः स्त्रीणां शंकरस्य रहोविधौ ।। ३४

तस्माते परुषा रूक्षा जडा त्ददय वर्जिता ।।
गणेशाक्षरसदशा शिला॒माता भविष्यति ।। ३५

---

१ बृ. देव
२ ब्र. अ. बुध्वा
३ ब. मैद्रे

एवमुत्सृष्ट शापाय गिरिपुत्र्यास्त्वनं तरम् ॥
निर्जगाम मुखात्क्रोधः सिंहरूपी महावलः ॥ ३६

पश्चात्तापं समाश्रित्य तया देव्या विसर्जितः ॥
स तु सिंहः करालास्यो महाकेसरकंधरः ॥ ३७

प्रोद्धूतबललांगुल दंष्ट्रोत्कट गुहामुखः ॥
व्यावृतास्यो ललज्जिह्वः क्षामकुक्षिश्चिखादिषुः ॥ ३८

तस्यास्ये वर्तितुं देवी व्यवस्यत सती तदा[1] ॥
ज्ञात्वा मनोगतं तस्या भगवांश्चतुराननः ॥ ३९

आजगामाश्रमपदं संपदामाश्रयं ततः ॥
आगम्योवाच तां ब्रह्मा गिरिजां मृष्टया गिरा ॥ ४०

किं देवि प्राप्तु कामासि किमलभ्यं ददामि ते ॥
तच्छ्रुत्वोवाच गिरिजा गुरु गौरव गर्भितम् ॥ ४१

तपसा दुष्करेणाप्तः पतित्वे शंकरो मया ॥
स मां श्यामलवर्णेति बहुशः प्रोक्तवान्भवः ॥ ४२

---

१ ब. सदा

स्यामहं कांचनाकारा वाल्लभ्येन च संयुता ।।
भर्तुर्भूक्तिपतेरंगे ह्येकतो निर्विशंकिता ।। ४३

तस्यास्तद्भाषितं श्रुत्वा प्रोवाच जलजासनः ।।
एवं भवतु भूयस्त्वं भर्तुर्देवहार्ध धारिणी ।। ४४

ततस्तस्याः शरीरात्तु स्त्री सुनीलांबुजत्त्विषा ।।
निर्गता सा भवद्भीमा घंटाहस्ता त्रिलोचना ।। ४५

नानाभरण पूर्णांगी पीतकौशेय वासिनी ।।
तामब्रवीततो ब्रह्मा देवीं नीलांबुजत्त्विषाम् ।। ४६

अस्माद्भूधरजा देह संपर्कात्त्वं ममाज्ञया ।।
संप्राप्ता कृतकृत्यत्वमे कानंशा पुराकृतिः ।। ४७

य एष सिंहः प्रोद्भूतो देव्याः क्रोधाद्वरानने ।।
त तेस्तु वाहनो देवि के तौ चास्तु महाबलाः ।। ४८

गच्छ विंध्याचले तत्र सुरकार्यं करिष्यति[२] ।।
अत्र शुंभनिशुंभौ च हत्वा तारक सैन्ययौ ।। ४९

---

१ ब. बुजत्वचा

२ ब. "सि"

पांचालोनाम यक्षो(ऽ)यं यक्षलक्ष पदानुगः ।।
दत्तेस्ते किंकरो देवि महामाया शतैर्युतः ।। ५०

इत्युक्ता कौशिकी देवी तथेत्याह पितामहम् ।।
निर्गतायां च कौशिक्यां जातास्वैराश्रिता गुणैः ।। ५१

सर्वैः पूर्वभवोपात्तैस्तदा स्वयमुपस्थितैः ।।
उमापि प्राप्त संकल्पा पञ्चातापश्वा परायणा[१] ।। ५२

मुहुः स्वं परिनिंदंती जगाम गिरिशांतिकम् ।।
संप्रयांतीं च तां द्वारि अपवार्य समाहितः[२] ।। ५३

रुरोध वीरको देवीं हेमवेत्रलताधरः ।।
तामुवाच च कोपेन तिष्ठ तिष्ठक्व यासि च ।। ५४

प्रयोजनं न ते(ऽ)स्तीह गच्छ यावन्नभत्स्यसि ।।
देव्या रूपधरो दैत्यो देवं वंचयितुं त्विह ।। ५५

प्रविष्टो न च दृष्टो(ऽ)सौ स च देवेन घातितः ।।
घातिते चाहमाक्षिप्तो नीलकण्ठेन धीमता ।। ५६

---

१ ब. णाः
२ ब. समाहिता

कापि स्त्री नापि मोक्तव्या त्वया पुत्रेति सादरम् ।।
तस्माच्वमत्र द्वारिस्था वर्षपूगान्यनेकशः ।। ५७

भविष्यसि न चाप्यत्र प्रवेशं लप्स्यसे व्रज ।।
एका मे प्रविशेदत्र माता या स्नेहवत्सला ।। ५८

नगाधिराज तनया पार्वती रुद्रवल्लभा ।।
इत्युक्त्वा तु ततो देवी चिंतयामास चेतसा ।। ५९

न सा नारी तु दैत्योऽसौ वायोर्नैवावभासत ।।
वृथैव वीरकः शप्तो मया क्रोध परीतया[1] ।। ६०

अकार्यं क्रियते मूढैः प्रायः क्रोध समन्वितैः ।।
क्रोधेन नश्यते कीर्तिः क्रोधो हंतिस्थिरांश्रियम् ।। ६१

अपरिच्छिन्नसर्वार्था पुत्रं शापितवत्यहम् ।।
[2]विपरीतार्थ बोद्धृणां सुलभा विपदो यतः ।। ६२

संचिंत्यैवमुवाचेदं वीरकं प्रति शैलजा ।।
अधो लज्जाविकारेण वदनेनांबुजत्विषा ।। ६३

---

१ ब. तथा
२ ब. धिपरीतार्थ

अहं वीरक ते माता मा तेऽस्तु मनसो भ्रमः ।।
शंकरस्यास्मि दयिता सुता तु हिमभूमृतः ।। ६४

मम गात्र स्थिति भ्रांत्या मा शंकां पुत्र भावय ।।
तुष्टेन गौरता दत्ता ममेयं पद्मयोनिना ।। ६५

मया शप्तोऽस्यविदिते वृतांते दैत्यनिर्मिते ।।
ज्ञात्वा नारीप्रवेशं तु शंकरे[1] रहसि स्थिते ।। ६६

न निवर्तयितुं शक्यः शापः किं तु ब्रवीमि ते ।।
मानुष्यां तु शिलायां त्वं शिलादात्संभविष्यसि ।। ६७

पुण्ये चाप्यर्बुदारण्ये स्वर्गमोक्षप्रदे नृणाम् ।।
अचलेश्वर[2]लिंगं तु वर्तते यत्र वीरक[3] ।। ६८

वाराणस्यां विश्वनाथसमं तत्फलदं नृणाम् ।।
प्रभासस्य च यात्राभिर्दशभिर्यत्फलं नृणाम् ।। ६९

तदेकयात्रया प्रोक्तमर्बुदस्य महागिरेः ।।
यत्र तप्त्वा तपो मर्त्या देहधातून्विहाय च ।। ७०

---

१ ब. रह सिंस्थिते

२ ब. अचरेश्वर....

३ ब. वीरके

संसारी न पुनर्भूयान्महेश्वरवचो यथा ।।
अर्बुदो यदि लभ्येतै सेवितुं जन्मदुःखीतैः ।। ७१

वाराणसीं च केदारं किं स्मरंति वृथैव ते ।।
तत्राराध्य भवं देवं भवान्नन्दीति नामभृत् ।। ७२

शीघ्रमेष्यसि चात्रैव प्रतीहारत्वमाप्स्यसि ।।
एवमुक्ते त्वदष्टरोमा वीरकः प्रणिपत्य ताम् ।। ७३

संस्तूय विविधैर्वाक्यैर्मातरं समभाषत ।।
धन्योऽहं देवि यो लप्स्ये मानुष्यमति दुर्लभम् ।। ७४

शापोऽनुग्रहरूपोयं विशेषादर्बुदाचले ।।
समीपे यस्य पुण्योऽस्ति महीसागर संगमः ।। ७५

ऊधः पृथिव्या देशोऽयं यो गिरिश्रेष्ठार्णवांतरे ।।
तत्र गत्वा महत्पुण्यम वाप्य भवभक्तितः ।। ७६

पुनरैष्यामि भो मातरित्युक्त्वा भूच्छिलासुताः ।।
देवी[१] च प्रविवेशाथ भवनं शशिमौलिनः ।। ७७

---

१ ब. देवीं

इत्यार्बुदाख्यानम् ।।[१]

ततो दृष्ट्वा च तां प्राह धिग्नार्य इति त्र्यंबकः ।। ७८

सा च प्रणम्य तं प्राह सत्यमेतन्न मिथ्यया ।।
जडः प्रकृति भागोयं नार्यश्चार्हति निन्दनाम् ।। ७९

पुरुषाणां प्रसादेन मुच्यंते भवसागरात् ।।
ततः प्रहृष्टस्तामाह हरो योग्यया/धुना शुभे ।। ८०

पुत्रं दास्यामि येन त्वं ख्यातिमाप्स्यसि शोभने ।।
ततो रेमे हि देव्या स नानाश्चर्यालयो हरः ।। ८१

ततो वर्षसहस्त्रेषु देवास्त्वरित मानसाः ।।
ज्वलनं नोदयामासुर्ज्ञातुं शंकरचेष्टितम् ।। ८२

द्वारि स्थितं प्रतीहारं वंचयित्वा च पावकः ।।
पारावतस्य रूपेण प्रविवेश हरांतिकम् ।। ८३

यदृशे तं च देवेशो विनतां प्रेक्ष्य पार्वतीम् ।।
ततस्तं ज्वलनं प्राह नैतद्योग्यं त्वया कृतम् ।। ८४

---

१ "इत्या.......नम्" ।। ब. प्रतौ इत्ययं पाठः नास्ति ।

यदिदं क्षुभितं स्थानान्मम तेजोह्यनुत्तमम् ।।
गृहाण त्वं सुदुर्बुद्धे नो वा धक्ष्यामि त्वां [illegible] रुषा ।। ८५

भीतस्ततोऽसौ जग्राह सर्वदेवमुखं च सः ।।
तेन ते वह्निसहिता विह्वलाश्च सुराःकृताः ।। ८६

विपापृय जठराण्येषां वीर्यं माहेश्वरं ततः ।।
निष्क्रांतं तत्सरो जातं पारदं शतयोजनम् ।। ८७

वह्निश्च व्याकुलीभूतो गंगायां मुमुचे सकृत् ।।
दह्यमाना च सा देवी तरंगैर्बहिरुत्सृजत् ।। ८८

जातिस्त्रिभुवनख्यातस्तेन च श्वेतपर्वतः ।।
एतस्मिन्नंतरे वह्निराहूतश्च हिमालये ।। ८९

सप्तर्षिभिर्वह्निहोमं कुर्वद्भिर्मंत्र वीर्यतः ।।
आगत्य तत्र जग्राह[1] वह्निर्भागं च तं हुतम् ।। ९०

गतेऽवह्नयत्वस्मिंश्च तत्रस्थः पत्नीस्तेषाम पश्यत् ।।
सुवर्ण कदली स्तंभ निभास्ताश्चंदलेखया ।। ९१

---

१ ब. जगृहे

पश्यमानः[१] प्रफुल्लाक्षो वह्निः कामवशं गतः ।।
स भूयश्चिंतयामास न न्याय्यं क्षुभितोऽस्मियत् ।। ९२

साध्वीः पत्नीर्द्विजेंद्राणाम कामाः कामयाम्यहम् ।।
पापमेतत्कर्म चोग्रं नश्यामि तृणवत्स्फुटम् ।। ९३

कृत्वैतन्नश्यते कीर्तिर्यावदाचंद्र तारकम् ।।
एवं संचिंत्य बहुधा गत्वा चैववनांतरम् ।। ९४

संयन्तुं नाभवच्छक्त उपायैर्बहुभिर्मनः ।।
ततः स काम संतप्तो मूर्छितः समपद्यत ।। ९५

ततः स्वाहा च भार्यास्य[२] बुबुधे तद्विचेष्टितम् ।।
ज्ञात्वा च चिंतयामास प्रत्दृष्टा मनसि स्वयम् ।। ९६

स्वां[३] भार्यामिथ मां त्यक्त्वा बहुवासादवज्ञया ।।
भार्याः कामयते नूनं सप्तर्षीणां महात्मनाम् ।। ९७

तद्दहासां रूपमाश्रित्य रमिष्ये तेन चाप्यहम् ।।
ततस्त्वंगिरसो भार्या शिवानामेति शोभना ।। ९८

---

१ ब. " न "
२ ब. भायास्य
३ ब. " सा " इति पाठः ।

तस्या रूपं समाधाय पावकं प्राप्य साब्रवीत् ।।
मामग्रे कामसंतप्तां त्वं कामयितुमर्हसि ।। ९९

न चेत्करिष्यसे देव मृतां मामुपधारय ।।
अहमंगिरसो भार्या शिवानाम हुताशन ।। १००

सर्वाभिः सहिता प्राप्ता ताश्च यास्यंत्यनुक्रमात् ।।
अस्माकं त्वं प्रियो नित्यं त्वच्चित्ताश्च वयं तथा ।। १०१

ततः स कामसंतप्तः संबभूव[1] तया सह ।।
प्रीते[2] प्रीता च सा देवी निर्जगाम वनांतरात् ।। १०२

चिंतयंति ममेदं चेद्रूपं द्रक्ष्यंति कानने ।।
ते ब्राह्मणीनाम नूनं दोषं वक्ष्यंति पावकात् ।। १०३

तस्मादेत द्रक्षमाणा गरुडी संभवाम्यहम् ।।
सुपर्णी सा ततो भूत्वा यदशे श्वेतपर्वतम् ।। १०४

शरस्तंबैः सुसंपृक्तं रक्षोभिश्च पिशाचकैः ।।
सा तत्र सहसा गत्वा शैलपृष्ठे सुदुर्गमम् ।। १०५

---

१ ब. भु
२ ब. पीते

प्राक्षिपत्कांचने कुंडे शुक्रं तद्धारणे(ऽ)क्षमा ।।
शिष्टानामपि देवीनां सप्तर्षीणां महात्मनाम् ।। १०६

पत्नीसरूपतां कृत्वा कामयामास पावकम् ।।
दिव्यं रूपमरुंधत्याः कर्तुं न शक्तिं तथा ।। १०७

तस्यास्तपः प्रभावेण[1] भर्तुः शुश्रुषाणेन च ।।
षाटकृत्वस्ततु निक्षिप्तमग्निरेतः कुरु द्वह ।। १०८

कुंडे(ऽ)स्मिन्नत्र बहुले प्रतिपद्येव स्वाहया ।।
ततश्च पावको दुःखाच्छुशोच च मुमोह च ।। १०९

अः पापं कृतमित्येव देहन्यासे/करोन्मतिम् ।।
ततस्तं खेचरी वाणी प्राह मा मरणं कुरु ।। ११०

भाव्यमेतच्च भाव्यर्थात्को हि पावक मुच्यते ।।
भाव्यर्थेनापि यत्ते च परदारोपसेवनम् ।। १११

कृतं तच्चेतसा तेन त्वामजीर्णं प्रवेक्ष्यति ।।
श्वेतकेतोर्महायज्ञे घृतधाराभितर्पितम् ।। ११२

---

१ ब. प्रभावेन

शोकं च त्यज नेत्रास्ताः स्वाहे वेयं तव प्रिया ।।
श्वेतपर्वत कुंडस्थं पुत्रं त्वं[1] द्रष्टुमर्हसि ।।
ततो वह्निस्तत्र गत्वा ददर्श तनयं प्रभुम् ।। ११३

अर्जुन उवाच ।।
कस्मात्स्वाहा करोद्रूपं षण्णां तासां महामुने ।। ११४

न बिभेति च किं ताभ्यः षड्भ्यः स्वाहा/पराधिनी ।।
भर्तृभक्तया जगद्गुर्धं यतः शक्ताश्च ता मुने ।। ११५

नारद उवाच ।।[2]
सत्यमेतत्कुरुश्रेष्ठ शृणु तच्चापि कारणम् ।।
येन तासां कृतं रूपं न वा शापं ददुश्च ताः ।। ११६

यत्र[3] तद्वह्निनाक्षिप्तं रुद्रतेजः सकृत्पुरा ।।
गंगायां तत्र सस्नुस्ताः षटस्न्यो/ज्ञान भावतः ।। ११७

ततस्ता विह्वलीभूतास्तेजसा तेन मोहिताः ।।
लज्जया च स्वभर्तृणां गंगातीर स्थिता रहः ।। ११८

एतदतरमालोक्य चिकीर्षंती मनीषितम् ।।
स्वाहा शरीरमाविश्य तासां तेजोजहार तत् ।। ११९

---

१ ब. " च " पाठः ।
२ ब. श्री नारद उ० ।।
३ ब. यतु

[1]चिक्रीड वह्निजायापि यथा ते कथितं मया ।। १२०

उपकारमिमं ताभिः स्मरंतीभिश्च भारत ।।
न शप्ता सा यतः शापो न देयश्चोपकारिणि[2] ।। १२१

ततः सप्तर्षयो ज्ञात्वा ज्ञानेनाशुचितां गताः ।।
तत्यजुः षाट् तदा पत्नीर्विना देवीमरुंधतीम् ।। १२२

विश्वामित्रस्तु भगवान्कुमारं शरणं गतः ।।
स्तवं दिव्यं संप्रचक्रे महासेनस्य चापि सः ।। १२३

अष्टोत्तरशतं नाम्नां[3] शृणुत्वं तानि फाल्गुन ।।
जपेनयेषां पापानि यांति ज्ञानमवाप्नुयात् ।। १२४

त्वं ब्रह्मवादी त्वं ब्रह्मा ब्रह्म ब्राह्मणवत्सलः ।।
ब्रह्मण्यो ब्रह्मदेवश्च ब्रह्मदो ब्रह्मसंग्रहः ।। १२५

त्वं परं परमं तेजो मंगलानां च मंगलम् ।।
अप्रमेयगुणश्चैव मंत्राणां मंत्रगो भवान् ।। १२६

---

१ ब. वि

२ ब. कारिणी

३ ब. नाम्ना

त्वं सावित्रीमयो देव सर्वत्रैवापराजितः ।।
मंत्रः[१] शर्वात्मको देवः षडक्षरवतां वरः ।। १२७

मालीमौली पताकी च जटी मुंडी शिखंडयपि ।।
कुण्डली लांगली बालः कुमारः प्रवरो वरः ।। १२८

गवांपुत्रः[२] सुरारिघ्नः संभवो भवभावनः ।।
पिनाकी शत्रुहा श्वेतो गूढः स्कन्दः करागूणीः ।। १२९

द्वादशो भर्भुवो भावी भुवः पुत्रो नमस्कृतः ।।
नागराजः[३] सुधर्मात्मा नाकपृष्ठः सनातनः ।। १३०

त्वं भर्ता सर्वभुतात्मा त्वं त्राता त्वं सुखावहः ।।
शरदक्षः शिखी[४] जेता षड्वक्रो भयनाशनः ।। १३१

हेमगर्भो महागर्भो जयश्च विजयेश्वरः ।।
त्वं कर्ता त्वं विधाता च नित्यो नित्यारिमर्दनः ।। १३२

महासेनो महातेजा वीरसेनश्च भूपतिः[५] ।।
सिद्धासनः सुराध्यक्षो भीमसेनो निरामयः ।। १३३

---

१ ब. मंत्र
२ ब. पुत्र
३ ब. नागराजा
४ ब. "सखी" इतिस्यात् ।
५ ब. "ति"

शौरिर्मदुर्महातेजा वीर्यवान्सत्य विक्रम : ।।
तेजोगर्भो सुररिपुः सुरमूर्तिः सुरोर्ज्जितः ।। १३४

कृतज्ञो वरदः सत्यः शरण्यः साधुवत्सलः ।।
सुव्रतः सूर्यसंकोशो वह्निगर्भः कणो भुवः ।। १३५

पिप्पली शीघ्रगो रौद्री गांगयो रिपुदारणः ।।
कार्त्तिकेयः प्रभुः क्षंता नीलदंष्ट्रो महामनाः ।। १३६

निग्रहो निग्रहाणां च नेता त्वं सुरनंदनः ।।
प्रगहः परमानंदः क्रोधघ्नस्तार उच्छ्रितः ।। १३७

कुक्कुटी बहुली दिव्यः कामदो भूरिवर्धनः ।।
अमोधो मृतदो ह्यग्निः शत्रुघ्नः सर्वमोदनः ।। १३८

अव्ययो ह्यमरः श्रीमानुन्नतो ह्यग्निसंभवः ।।
पिशाचराजः सूर्याभः शिवात्मा शिवनंदनः ।। १३९

अपारपारो दुर्ज्ञेयः सर्वभूतहिते रतः ।।
अग्राह्य:[१] कारणं कर्ता परमेष्ठी परंपदम् ।। १४०

---

१ ब. अग्राह्य ।

अचिंत्यः सर्वभूतात्मा सर्वात्मा त्वं सनातनः ।।
एवं स सर्वभूतानां संस्तुतः परमेश्वरः ।। १४१

नाम्नामष्टशतेनायं विश्वामित्रमहर्षिणा ।।
प्रसन्नमूर्ति राहेदं मुनींद्रं व्रियतामिति ।। १४२

मम त्वया द्विजश्रेष्ठ स्तुतिरेषा निरूपिता ।।
भविष्यति मनोऽभीष्ट प्राप्तये प्राणीनां भुवि ।। १४३

विवर्धते कुले लक्ष्मीस्तस्य यः प्रपठेदिमम् ।।
न राक्षसाः पिशाचा वा न भूतानि न चापयः ।। १४४

विघ्नकारीणि तद्गेहे यत्रैव संस्तुवंति माम् ।।
दुःस्वप्नं च न पश्येत्स बद्धो मुच्येत बंधनात् ।। १४५

स्तवस्यास्य प्रभावेण[१] दिव्यभावः पुमान्भवेत् ।।
त्वं च मां श्रुति संस्कारैः सर्वैः संस्कृर्तुमर्हसि ।। १४६

संस्काररहितं जन्म यतश्श्चैव पशुवत्स्मृतम् ।।
त्वं च मद्वरदानेन ब्रह्मर्षिश्चैव भविष्यसि ।। १४७

---

१ ब. प्रभावेन

ततो मुनिस्तस्य चक्रे जातकर्मादिकाः क्रियाः।।
पौरोहित्यं तथा भेजे स्कंदस्यैवाज्ञया प्रभुः ।। १४८

ततः स्तं वह्निरभ्या गाददर्श च सुतं गृहम्[१]।।
षट्छीर्षं द्विगुणश्रोतं द्वादशाक्षिभुज क्रमम् ।। १४९

एकग्रीवं चैककायं कुमारं सव्यलोकयत् ।।
कलिलं प्रथमे चाह्नि द्वितीये व्यक्ततां गतम् ।। १५०

तृतीयायां शिशुर्जातश्चतुर्थ्यां पूर्ण एव च ।।
पंचम्यां संस्कृतः सो/भूत्पावकं चाप्य पश्यत् ।। १५१

ततस्तं पावकः[२] पार्थ आलिलिंग चचुंब च ।।
पुत्रेति चोक्त्वा तस्मै स शक्त्यस्त्रमयदात्स्वयम् ।। १५२

स च शक्तिं समादाय नमस्कृत्य च पावकम् ।।
श्वेत श्रृंगं समारुढो मुखैः पश्यन्दिशोदश ।। १५३

व्यनदद्भैरवं नादं त्रासयन्सासुरं जगत् ।।
ततः श्वेतगिरेः श्रृंगं दक्षः पद्मदशावृतम् ।। १५४

---

१ ब. गृहं
२ ब. पाकः

बिभेद तरसा शक्त्या शतयोजन विस्तृतम् ।।
तदेकेन प्रहारेण खंडशः पतितं भुवि ।। १५५

चूर्णीकृता राक्षसास्ते सततं धर्म शत्रवः ।।
ततः प्रव्यथिता भूमिर्व्यशीर्यत समंततः ।। १५६

भीताश्च पर्वताः सर्वे चकुशुः प्रलयाद्य था ।।
भूतानि तत्र सुभृशं त्राहित्राहीति चोज्जगुः ।। १५७

एवं श्रुत्वा ततो देवा वासवं सह ते(बुवन् ।।
येनैकेन प्रहारेण[१] त्रैलोक्यं व्याकुलीकृतम् ।। १५८

स संक्रुद्धः क्षणाद्विश्वं संहरिष्यति वासव ।।
वयं च पालनार्थाय सृष्टा देवेन वेधसा ।। १५९

तच्चत्राणं सदा कार्यं प्राणैः कंठगतैरपि ।।
अस्माकं पश्यतामेवं यदि संक्षोभ्यते जगत् ।। १६०

धिक्तो जन्म वीराणां श्लाघ्यं हि मरणं क्षणात ।।
तदस्माभिः सहैनं त्वंक्षंतुमर्हसि वासव ।। १६१

---

१ ब. प्रकारेण

एवमुक्तस्तथेत्युक्त्वा देवैः सार्धं तमभ्ययात् ।।
विधित्सुस्तस्य वीर्यं स शक्रस्तूर्णं तरं तदा ।। १६२

उग्रं तच्च महावेगं देवानीकं दुरासदम् ।।
नर्दमानं गुहः प्रेक्ष्य ननाद जलधिर्यथा ।। १६३

तस्य नादेन महता समुद्धतोदधि प्रभम् ।।
बभ्राम तत्रतत्रैव देव सैन्यमचेतनम् ।। १६४

जिघांसूनुपसंप्राप्तान्देवान्दृष्ट्वा स पावकिः ।।
विससर्ज्ज मुखात्तत्र प्रवृद्धाः[1] पावकार्चिषाः ।। १६५

अदहद्देव सैन्यानि चेष्टमानानि भूतले ।।
ते प्रदीप्त शिरोदेहाः प्रदीप्तायुध वाहनाः[2] ।। १६६

प्रच्युताः सहसा भांति दिवस्तारा गणा इव ।।
दह्यमानाः प्रपन्नास्ते शरणं पावकात्मजम् ।। १६७

देवा वज्रधरं प्रोचुस्त्यज वज्रं शतक्रतो ।।
उक्तो देवैस्तदा शक्रः स्कंदे वज्रवासृजत् ।। १६८

---

१ ब. पवृद्धा
२ ब. ना

तद्विसृष्टं जघानाशु पार्श्वं स्कंदस्य दक्षिणम् ।।
विभेद च कुरुश्रेष्ठ तदा तस्य महात्मनः ।। १६९

वज्रप्रहारात्स्कंदस्य संजातः पुरुषोऽपरः ।।
युवा कांचनसन्नाहः शक्ति धृग्दिव्य कुंडलः ।। १७०

शाख इत्यभिविख्यातः सोपि व्यनददद्भुतम् ।।
ततश्चेंद्रः पुनः क्रुद्धो त्वदि स्कंदं व्यदारयत् ।। १७१

तत्रापि तादृशो जज्ञे नैगमेय इति श्रुतः ।।
ततो विनद्य स्कंदाद्याश्चत्वारस्तं तदाभ्युयुः ।। १७२

तदेंद्रो वज्रमुत्सृज्य प्रांजलिः शरणं ययौ ।।
तस्माभयं ददौ स्कंदः[1] सहसैन्यस्य सत्तमः ।। १७३

ततः प्रहृष्टास्त्रिदशा वादित्राण्यभ्य वादयन् ।।
वज्रप्रहारात्कन्याश्च जज्ञिरेऽस्य महाबलाः ।। १७४

या हरंति शिशून्जातान्गर्भस्थांश्चैव दारुणाः ।।
काकी च हिलिमा चैव रुद्रा च वृषभा तथा ।। १७५

---

१ ब. स्कंदे

आयार[1] पलाला मित्रा च सप्तैताः शिशुमातरः ।।
एतासां वीर्य संपन्नः शिशुर्श्वा भूत्सुदारुणः ।। १७६

स्कंदप्रसादजः पुत्रो लोहिताक्षो भयंकरः ।।
एष वीराष्टकः प्रोक्तः स्कंदमातृगणाद्भुतः ।। १७७

पूजनीयः सदा भक्त्या सर्वापस्मार शांतिदः ।।
उपातिष्ठततः[2] स्कंद हिरण्यकवचस्त्रजम् ।। १७८

लोहितांबर संवीतं त्रैलोक्यस्यापि सुप्रभम् ।।
युवानं श्रीः स्वयं भेजे तं प्रणाम्य[3] शरीरिणी ।। १७९

श्रिया जुष्टं च तं प्राहुः सर्वे देवाः प्रणाम्य वै ।।
हिरण्यवर्ण्ण भद्रं ते लोकानां शंकरो भव ।। १८०

भवानिंद्रोस्तु नो नाथ त्रैलोक्यस्य हिताय वै ।। १८१

स्कंद उवाच ।।[4]
किमिंद्रः सर्वलोकानां करोतीह सुरोत्तमाः ।।
कथं देवगणांश्चैव पाति नित्यं सुरेश्वरः ।। १८२

---

१ ब. आर्या
२ ब. उपतिष्टंस्ततः
३ ब. णा
४ ब. प्रतौ नास्ति ।

देवा ऊचुः ॥[1]
इंद्रो हि दिशति भूतानां बलं तेजः प्रजाः सुखम् ॥
प्रज्ञां प्रयच्छति तथा सर्वान्दायान्सुरेश्वरः ॥ १८३

दुर्वृत्तानां स हरति वृत्तस्थानां प्रयच्छति ॥
अनुशास्ति च भूतानि कार्येषु बलवत्तरः ॥ १८४

असूर्ये च भवेत्सूर्यस्तथा चंद्रे च चंद्रमाः ॥
भवत्यग्निश्च वायुश्च पृथिव्यां जीवकारणम् ॥ १८५

त्वं चंद्रो[2] भव नो वीर तारकं जहि ते नमः ॥ १८६

इंद्र उवाच ॥
त्वं भवेंद्रो[3] महाबाहो सर्वेषां न सुखावहः[4] ॥
प्रणम्य प्रार्थये स्कंद तारकं जहि रक्ष नः ॥ १८७

स्कंद उवाच ॥
शाधि त्वमेव त्रैलोक्यं भवानिंद्रोस्तु सर्वदा ॥
करिष्ये चेंद्रकर्माणि न ममेंद्रत्वमीप्सितम् ॥ १८८

त्वमेव राजा भद्रं ते त्रैलोक्यस्य ममैव च ॥
करोमि किं च ते शक्र शासनं ब्रूहि तन्मम ॥ १८९

---

१ ब. देवा उ० ॥
२ ब. चेंद्रे
३ ब. भवस्त्वे
४ ब. वह

इंद्र उवाच ।।
यदि सत्यमिदं वाक्यं निश्चयाद्भाषितं त्वया ।।
अभिषिच्यस्व देवानां सैनापत्ये महाबल[1] ।। १९०

स्कंद उवाच ।।
दानवानां विनाशाय देवानामर्थ सिद्धये ।।
गोब्राह्मणस्य चार्थाय एवमस्तु वचस्तवा ।। १९१

इत्युक्ते सुमहानादः सुराणामभ्यजायत ।।
भूतानां चापि सर्वेषां त्रैलोक्याकंप कारकः ।। १९२

जयेति तुष्टुवुश्चैनं वादित्राण्यभ्य वादयन् ।।
ननृतुस्तुष्टुवुश्चैनं कराघातांश्चे चक्रिरे ।। १९३

तेन शब्देन महता विस्मता नग नंदिनी ।।
शंकर प्राह को देव नादोऽयमति वर्तते ।। १९४

रुद्र उवाच ।।
अद्य नूनं प्रत्दृष्टानां सुराणां विविधागिरैः ।।
श्रूयंते च तथा देवि[2] यथा जातः[3] सुतस्तव ।। १९५

गवां च ब्राह्मणानां च साध्वीनां च दिवौकसाम् ।।
मार्जयिष्यति चाश्रुणि पुत्रस्ते पुण्यवत्यपि ।। १९६

---

१ ब. बलः
२ ब. देवी
३ ब. जात

एवं वदति सा देवी द्रष्टुं तमुत्सुका/भवत् ।।
शंकरश्च महातेजाः पुत्रस्नेहाधिको यतः ।। १९७

वृषभं तत आरुह्य देव्या सह समुत्सुकः ।।
सगणो भव आगच्छत्पुत्र दर्शन लालसः ।। १९८

ततो ब्रह्मा महासेनं प्रजापतिरथाब्रवीत् ।।
अभिगच्छ महादेवं पितरं मातरं प्रभो ।। १९९

अनयोर्वीर्य संयोगात्तवोत्पत्तिस्तु प्राथमी[1] ।।
एवमस्तित्वति चाप्युक्त्वा महासेनो महेश्वरम् ।। २००

अपूजयदमेयात्मा पितरं मातरं च ताम्[2] ।।
ततस्तमालिंग्य सुतं चिरं संयोज्य चाशिषाः ।। २०१

चिरं जत्दषातुश्चौभौ पार्वती परमेश्वरौ ।।
सिद्ध सारस्य तत्वं च ददौ तुष्टो/स्य शंकरः ।। २०२

देवी प्रकृति मोक्षं च तुष्टा हर्षपरिप्लुता ।।
एतस्मिन्नेव काले तु षाड्देव्यस्तं समागमन् ।। २०३

---

१ ब. प्राप्यमी
२ ब. प्रतौ नास्ति ।

ऋषिभिस्ताः परित्यक्तास्तं पुत्रेति जगुस्तदा ।।
पार्वती च ततः प्राह मम पुत्रो न वस्त्वयम् ।। २०४

स्वाहा ममेति च प्राह पावकश्च ममेति च ।।
रुद्रो ममेति च प्राह मम देवनदीति च ।। २०५

चक्रुस्ते कलहं घोरं विवदंतः परस्परम् ।।
पुत्रस्नेहो हि बलवान्[1]पार्थ किं किं न कारयेत् ।। २०६

ततस्तान्प्रहसन्नाह विवादो युज्यते न च ।।
सर्वेषां वो गुहः पुत्रो मत्तो वै विप्रतां वरः ।। २०७

ततः प्राहुश्च षाड्देव्यः स्वर्गो नो ह्यक्षयो भवेत्[2] ।।
तथेति ता गुहः प्राह शक्रस्तत्रांतरेऽब्रवीत् ।। २०८

रोहिण्याश्चानुजा स्कंद स्पर्धमानाभिजिस्खला ।।
इच्छंती ज्येष्ठतां देवी पृथक्त्वं च तपोरता ।। २०९

ततः प्रभृति मूढोऽस्मि तत्स्थाने स्थापयप्रभो ।।
ततस्तथेति च प्रोक्ते कृत्तिकास्ता दिवं गताः ।। २१०

---

१ ब. नू

२ ब. भवत्

नक्षत्रं सप्तशीर्षाभं भाति नद्वह्निन दैवतम् ।।
तदग्नेः प्रियतां देहि[1] सहवासं सदैव च[2] ।। २११

स्कंद उवाच ।।
हव्यं कव्यं च यत्किंचिद्द्विजा होष्यंति पावके ।। २१२

तत्ते नाम्ना प्रदास्यंति वासः सार्धं भवेत्तव ।।
पावकः पार्थयामास यज्ञभागान्पुनः सुतान् ।। २१३

स चाप्याहाद्यप्रभृति यज्ञभागानवाप्नुहि ।।
इतरे प्रार्थयामासुः ख्यातो नस्त्वं सुतो भव ।। २१४

एवमेवेति तानाह स्कंदस्तद्धि सुदुर्लभम् ।।
ततस्तं योगिनः सर्वे संभूय सनकादयः ।। २१५

योगीश्वरमिति प्राहुस्ततस्तं योगिनस्तथा ।।
जगदुर्देवताश्चैव नानावाद्यान्य वादयन् ।। २१६

अभिषिक्तेन तेनासौ शुशुभे श्वेतपर्वतः ।। २१७

---

१ ब. देवी
२ ब. प्रतौ "तां" इति स्यात् ।

ततोदेवाः सगन्धर्वा नृत्यंत्यप्सरसस्तथा ।।
त्दृष्टानां सर्व भूतानां श्रूयते निनदो महान् ।। २१८

एवं सेन्द्रं जगत्सर्व श्वेतपर्वत संस्थितम् ।।
प्रत्दृष्टं प्रेक्ष्य तं स्कंदं न च तृप्यति दर्शनात् ।। २१९

१
*-इति श्री स्कादि.......स्कन्दस्य सर्वदेव सैनाधिपत्याभिषेकोत्सव वर्णनं-
नामि कोनत्रिंशो ऽध्यायः ।

---

१ * इति श्री स्कंद पुराणे कुमारिकाखंडे नवविंशो ऽध्यायः ।।